अङ्क-२७ वेदविद्या
जनवरी-जून २०१६ ISSN-2230-8962

# लिङर्थविचारः

**डॉ. रामबदन पाण्डेयः**

व्याकरणशास्त्रे दश लकाराः सन्ति, यथा - लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ् इति। तत्र लिङ्लकारविषये वैयाकरणनैयायिकप्रभाकर-आचार्यखण्डदेवादिभिः किमभिहितमिति विचार्यते।

तत्र प्रथमस्तावत् वैयाकरणमतम् उपस्थाप्यन्ते वैयाकरणैः **"विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्न-प्रार्थनेषु लिङ्**[१]**"** इति पाणिनिसूत्रेण विध्यादिष्वर्थेषु लिङ्विधानेन लोके प्रयोगाच्च विध्यादिरेव विशेषेण लिङर्था इति स्वीक्रियते।

तत्र विधिर्नाम प्रेषणं तच्च स्वापेक्षया निकृष्टस्य भृत्यस्य स्वाभिलषितेऽर्थे प्रवर्तनम् इयमेवाज्ञा। एवञ्च **'स्वर्गकामो यजेत्'** इत्यादावप्रवृत्तप्रयोज्यस्य तदभिलषिताज्ञातोपायप्रदर्शनोपदेशोऽपि विधिरेव। निमन्त्रणन्नियोगकरणम्। आवश्यकश्राद्धभोजनादौ स्वाभिलषिते प्रवर्तनमित्यर्थः।

तथा चोक्तं भाष्ये **"एवं तर्हि यन्नियोगतः कर्तव्यं तन्निमन्त्रणम्"**[२] इति ।आमन्त्रणञ्च स्वाभिलषिते कामचारेण प्रवर्त्यप्रहवर्तनम्। कामचारश्च प्रवर्त्यस्यैव। एषैव कामचारानुज्ञा। अत एव निमन्त्रणा-मन्त्रणयोर्भेदं प्रतिपादयता पतञ्जलिनोक्तं - **"आमन्त्रणे कामचारः"**[३] इति। व्याख्यातञ्च तत्रैव नागेशेनोद्योते-यत्र भोजनाद्यननुष्ठानेऽपि न प्रत्यवायस्तद्विषया प्रवर्तनामन्त्रणमिति तात्पर्यम्। आमन्त्रणम्.. कामचारानुज्ञा इति प्रतिपादितं कौण्डभट्टेनाऽपि। अधीष्टः सत्कारपूर्वको व्यापारः। यथा ... माणवकमध्यापयेत्। इयमेवाभ्यर्थना। उक्तं च -अधीष्टं नाम सत्कारपूर्विका व्यापारणा। सम्प्रश्नः सम्प्रधारणम्। प्रार्थना तु स्वाभिलषितदानप्रवर्त्तिकोक्तिः।

अत्रेदवधेयम्-यद्यपि लिङ्विधायके सूत्रे षण्णामुपादानमस्ति किन्त्वाद्येषु विध्यादिषु चतुर्षु अन्यदीयप्रवृत्तिजननानुकूलव्यापारत्वरूपस्य प्रवर्तनात्वस्यानुस्यूतत्वात् प्रवर्तनात्वमेव विध्याद्यर्थनिष्ठ-शक्यतावच्छेदकं न तु पृथक् पृथक् विधित्वादिकम् अनेकशक्यतावच्छेदके गौरवात् शक्तेर्नानात्व-प्रसङ्गाच्च। तथा चोक्तम्-

---

[१] पाणिनिसूत्रम् ३/३/१६१
[२] महाभाष्यम् ३/३/१६१
[३] महाभाष्यम् ३/३/१६१

**"अस्तिप्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि।**
**तत्रैव लिङ्विधातव्यः किं भेदस्य विवक्षया।**
**न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा।**
**विध्यादीनामुपादानं चतुर्णामादितः कृतम्"** ॥ इति।

नागेशेनाऽयुक्तम्-तत्र विध्यादिचतुष्टयानुस्यूतप्रवर्तनात्वेन चतुर्णां वाच्यता लाघवात्॥ कैयटेनाऽपि सिद्धान्तोऽयं प्रतिपादितः **प्रदीपे**[४]। "प्रपञ्चार्थं न्यायव्युत्पादनार्थं वार्थभेदमाश्रित्य भेदेनोपादानं विधिनिमन्त्रणादीनां कृतम्। विधिरूपता हि सर्वत्राऽन्वयिनी विद्यत" इति। तत्र प्रपञ्चार्थमित्यास्याशयं प्रतिपादयता **पञ्चोलिनोक्तम्**[५] प्रपञ्चार्थमिति। प्रवर्तनात्वस्य शक्यतावच्छेदकत्वे तेन रूपेण विध्यादिष्वेव शक्तिरिति विस्तरेण ज्ञानार्थमिति भावः। एवञ्च प्रवर्तनात्वेनैव विध्यादीनां वाच्यतेति वैयाकरणसिद्धान्तः। एवञ्च प्रवर्तनारूपो व्यापारः इष्टसाधनत्वरूप एव। लोके सर्वपुरुषः "इदं क्रियमाणं मदिष्टसाधनमिति सम्प्रधार्यैव" प्रवर्तत इति सर्वजनीनोऽयमनुभवः। प्रयोजकवाक्यश्रवणसमनन्तरं प्रयोज्यवृद्धस्य प्रवृत्तिं दृष्ट्वा पार्श्वस्थः बालः स्वप्रवृत्तिसाधनेन प्रथममिष्टसाधनताज्ञानमनुमिनोति। प्रयोज्यवृद्धस्य अस्मिन् कर्मणि प्रवृत्तिः इष्टसाधनताज्ञानपूर्विका प्रवृत्तित्वात् मदीयप्रवृत्तिवत्। एवमिष्टसाधनताज्ञानेऽनुमिते तस्य ज्ञानस्य कारणं किमिति जिज्ञासायां तज्ज्ञानस्य लिङ्घटितवाक्यश्रवणसमनन्तरभावित्वात् तस्मिन् ज्ञाने तद्वाक्यजन्यत्वमवधारयति। एवञ्च लिङादिवशादेव तस्य प्रतीयमानत्वात् इष्टसाधनत्वस्य लिङ्वाच्यत्वम्, तस्य प्रवर्तकत्वाच्च प्रवर्तनारूपत्वमिति निश्चिनोति। तस्मादिष्टसाधनत्वमेव प्रवर्तनात्वेन रूपेण विध्यर्थ इति वैयाकरणसम्मतिः।

अभिहितञ्च कौण्डभट्टेन- **"प्रवर्तनात्वञ्च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम्। तच्चेष्टसाधनत्वस्यास्तीति तदेव विध्यर्थः"**।[६] नागेशेनाऽपि स्वीकृतोऽयं पक्षः- "प्रवर्तनात्वञ्च प्रवृत्तिजनकानविषयतावच्छेदकत्वं तच्चेष्टसाधनत्वस्यैवेति तदेव लिङर्थः।" यद्यपीष्टसाधनेऽपि चन्द्रमण्डलाद्यानयने एवं तृप्तिरूपेष्टसाधनेऽपि कृतिसाध्यमधुविषसम्पृक्तान्नभोजने च प्रवृत्त्यभावदर्शनात् प्रवर्तकज्ञानविषयतावच्छेदेन कृतिसाध्यत्वस्य बलवदनिष्टाननुबन्धित्वस्य च विध्यर्थत्वं वाच्यं तथापि कृतिसाध्येऽपि वस्तुनि वृथाश्रमजनतयेष्टजनकत्वाभावज्ञानेन द्वेषात् प्रतिबन्धकसत्त्वाद् वा प्रवृत्त्यभावदर्शनात् व्यभिचारः। एवञ्चास्तिककामुकस्य परस्त्रीगमने नरकादिबलवदनिष्टानुबन्धित्वेऽपि रागौत्कट्यात् प्रवृत्तिदर्शनेन व्यभिचारः।

एवञ्च अन्वयव्यतिरेकव्यभिचाराभ्यां कृतिसाध्यत्वबलवदनिष्टाननुबन्धित्वयोः प्रवृत्तिप्रयोजकत्वाभावेन प्रवर्तनात्वाभावात् न लिङ्वाच्यत्वम्। तथा चोक्तं नागेशेन **"न तु कृतिसाध्यत्वम्"**[७] तस्य यागादौ

---

[४] महाभाष्यम् ३/३/१६१
[५] वैयाकरणभूषणसारः (प्रभाटीका - पृष्ठं १५४)
[६] परमलघुमञ्जूषा - लादेशार्थविचारः - पृष्ठं ७७
[७] परमलघुमञ्जूषा - लादेशार्थविचारः – पृष्ठं ७७

लोकत एव लाभादित्यन्यलभ्यत्वात्। न च बलवदनिष्टाननुबन्धित्वं द्वेषाभावेनान्यथासिद्धत्वात्" इति।इमा एव पङ्क्तयः कौण्डभट्टेनाप्युद्धृता वैयाकरणभूषणसारस्य लकारार्थनिर्णये (१५७.१८५) पृष्ठेऽतः तेषां मतेऽपि कृतिसाध्यत्वस्य, बलवदनिष्टाननुबन्धित्वस्य वा लिङ्वाच्यत्वं नास्ति, अपि त्विष्टसाधनत्वस्यैवेति। मण्डनमिश्रैरप्यस्मिन्नेवार्थे स्वसम्मतिः प्रकटिता।

**पुंसो नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः।**
**प्रवृत्तिहेतुं धर्मञ्च प्रवदन्ति प्रवर्तनाम्॥** इति।[८]

एवं चेष्टसाधनत्वस्यैव लिङ्वाच्यत्वमेवेति वैयाकरणानां सर्वसम्मतः सिद्धान्तः।

### नैयायिकानां मतम्

नैयायिकास्तु बलवदनिष्टाननुबन्धित्वम् इष्टसाधनत्वम् कृतिसाध्यत्वञ्च तत्तद्धात्वर्थगतं विध्यर्थ इति स्वीकुर्वन्ति। तथा चोक्तम् - "किन्तु प्रवर्तकचिकीर्षायां[९] यत्प्रकारज्ञानस्य हेतुत्वं स तथा तादृशञ्च कृतिसाध्यत्वमिष्टसाधनत्वं बलवदनिष्टाननुबन्धित्वञ्च प्रत्येकमेव यागपाकादिधर्मिकतन्निश्चयादेव यागादिधर्मिकचिकीर्षोत्पत्त्या तत्र प्रवृत्तेः। एवञ्च यजेत पचेतेत्यादौ यागः कृतिसाध्य इष्टसाधनो बलवदनिष्टाननुबन्धी च इत्याकारको बोधः।

अयम्भावः लोके सर्वत्र चेतनस्य प्रवृत्तावुपर्युक्तं त्रयमप्यपेक्ष्यते। अन्यथेष्टसाधनत्वबलवदनिष्टाननुबन्धित्वयोस्सत्त्वेऽपि कृतिसाध्यत्वाज्ञानसुमेरुश्रृङ्गहारणादौ प्रवृत्तिर्न दृश्यते। विषसम्पृक्तमध्वन्नभक्षणादौ क्षुन्निवृत्तिरूपेष्टसाधनताज्ञानकृतिसाध्यताज्ञानयोस्सत्त्वेऽपि मरणसम्पादकत्वेन बलवदनिष्टाजनकत्वानाभावेन तत्र पुरुषाणां प्रवृत्तिर्न दृश्यते। तथा निष्प्रयोजने जलताडनादौ बलवदनिष्टाजनकत्वकृतिसाध्यत्वयोर्ज्ञानेऽपि इष्टसाधनत्वाभावेन तत्र पुंसां प्रवृत्तिर्न दृश्यते तस्माद्यत्र प्रवृत्तिर्दृश्यते तत्र उक्तत्रयं विदित्वैवेति त्रयाणामेव प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वेन विध्यर्थत्वं स्वीकरणीयम्। प्रतिपादितश्चैतत् सर्वं शब्दशक्तिप्रकाशे पङ्गुः समुद्रं न तरेदित्यादौ नञादिना समुद्रतरणादेः पङ्गुप्रभृतिकृतिसाध्यत्वनिषेधत्वनिषेधबोधानुरोधादवश्यं लिङर्थः। तृप्तिकामो जलं न ताडयेदित्यादौ तृप्तिकामेष्टसाधनत्वस्य न कलञ्जं भुञ्जीतेत्यादौ च कलञ्जभक्षणादेर्बलवदनिष्टाजनकत्वस्य निषेधानुपपत्त्या इष्टसाधनत्वादिकमपि इति।

व्युत्पत्तिवादेऽपि गदाधरेण त्रयाणां प्रवर्तकज्ञानविषयत्वं स्वीकृतम्। तथाहि- **"विधिः प्रवर्तकज्ञानविषयो धर्मः स च धर्मो न्यायनये कृतिसाध्यत्वं बलवदनिष्टाननुबन्धित्वसहितमिष्ट-साधनत्वञ्च।"**[१०] एवञ्च कृतिसाध्यत्वबलवदनिष्टाननुबन्धित्व इष्टसाधनत्वादित्रयाणामपि विध्यर्थत्वमित्यत्र नास्ति मतभेदः प्राचीननव्ययोः। किन्तु तत्र त्रिष्वर्थेषु पृथक् पृथक् शक्तिः अथवा त्रितयानुगतैकैव शक्तिरित्यत्र विवादो

[८] विधिविवेकः श्लोकः।
[९] शब्दशक्तिप्रकाशिका - पृष्ठं ४१०
[१०] व्युत्पत्तिवादः - पृष्ठं ३४६

दृश्यते प्राचीननव्ययोः। तत्र बलवदनिष्टाजनकत्वादीनां त्रयाणां कस्य विशेष्यत्वं कस्य विशेषणत्वमित्यत्र विनिगमनाविरहात् त्रिष्वर्थेषु पृथगेव शक्तिः। एवञ्च पृथक्शक्तिस्वीकारेऽपि यथा सकृच्छ्रुतस्य पुष्पवन्तपदस्य युगपदेव सूर्यचन्द्ररूपानेकार्थबोधनम्; तथैव सकृच्छ्रुतस्य लिङादेरर्थत्रय-बोधकत्वमुपपद्यते। अतः पृथगेव शक्तिरिति नवीनाः।

प्राचीनास्तु वाचकशब्दनिष्ठाश्शक्तेर्वाच्यार्थनिरूपितायाश्च यथा वाचकानेककृतं नानात्वं तथैव वाच्यानेककृतमपि नानात्वं प्रसज्येत अतः पुष्पवन्तावित्यादौ दिवाकरनिशाकरयोरिव अत्रापि त्रिष्वर्थेष्वेकशक्तिस्वीकारेऽपि न दोष इति कथयन्ति।

**नैयायिकमतखण्डनम्**

**"न कलञ्जं भक्षयेत्"** इत्यादौ कलञ्जभक्षणम् इष्टसाधनत्वाभाववत् कृतिसाध्यत्वाभाववच्च इति अनुभवाभावात् तत्र नञ् बलवदनिष्टाननुबन्धित्वमात्रस्याभावं बोधयति, एवञ्च तत्र तस्यैव लिङर्थत्वं सम्भवति अन्येषामपि लिङर्थत्वेऽन्वयानुपपत्तिः। यदि तेषामपि तत्र लिङर्थत्वं तर्हि तेषां धात्वर्थ एवान्वयः स्वीकरणीयः। एवञ्च एकस्य नञर्थेऽन्वयः अन्ययोर्धात्वर्थ इति बलवदनिष्टाननुबन्धित्वस्यापि असत्वे नञि धात्वर्थे तत्सत्वे च नञर्थे इति गुरुभूतानेकसमभिव्याहारज्ञानघटितकार्य-कारणभावकल्पनापत्तिः। एवं "घटो नास्ति" इत्यादौ लिङादिसमभिव्याहाराभावे नञर्थस्याभावस्य प्रथमान्तपदोपस्थाप्ये आश्रयेऽन्वयः लिङादिसमभिव्याहारे च धात्वर्थ एव। एवमेवाख्यातार्थस्य कृत्यादेः नञोऽसत्वे प्रथमान्तपदोपस्थाप्य एव आश्रयता सम्बन्धेनान्वय तत्सत्वे तु तदर्थे प्रतियोगिताकत्व-सम्बन्धेनेत्यनेकव्युत्पत्तिकल्पनायामनेके कार्यकारणभावाः कल्पनीयाः। अतः ज्ञानगौरवादुपेक्षणीयं नैयायिकमतमिति।

**प्रभाकरमतम्**

प्रभाकरास्तु स्वविशेषणवत्ताज्ञानजन्यकार्यताज्ञानस्यैव प्रवर्तकत्वं स्वीकुर्वन्ति त्रयाणां कारणत्व-कल्पनायां कार्यकारणभावत्रयकल्पनायां गौरवात्। उक्तञ्च प्रभाकरमतमुपपादयता विश्वनाथपञ्चानन-भट्टाचार्येण कार्यताज्ञानं प्रवर्तकमिति गुरवः। अयम्भावः तत्र कार्यताज्ञानं द्विविधम्। पदार्थनिष्ठयोग्य-ताज्ञानजन्यं "मयेदं कर्तुं शक्यमित्येकम्। स्वेष्टसाधनत्वबलवदनिष्टाननुबन्धित्वज्ञानजन्यं ममेदमवश्यं कार्यमिति द्वितीयम्। इदमेव स्वविशेषणवत्ताज्ञानं प्रतिसन्धानजन्यम्। स्वं नियोज्यः तद्विशेषणं काम्ये फलकामना। अतः स्वेष्टसाधनत्वबलवदनिष्टाननुन्धित्वज्ञानजन्यकार्यताज्ञानं चिकीर्षाद्वारा प्रवर्तकमिति सिध्यति। प्रवर्तकत्वेन च तस्यैव विध्यर्थत्वम्।

एवञ्च कार्यत्वमेव विध्यर्थः। **'तृप्तिकामः पचेत्'** इत्यस्य तृप्तिकामनियोज्यः पाकः कार्यः इति बोधः। एवं **"शुचिसन्ध्यामुपासीत्"** इत्यादिवैदिकविधिर्वेदाधीनकार्यताज्ञानात् योग्यता। तथा च शुचिनियोज्यकं सन्ध्यावन्दनादिकं कार्यमिति बोधः।

भाट्टमते तु लिङादिशब्दनिष्ठा प्रवर्तना विध्यर्थः। प्रवृत्तिश्च द्वेधा स्वेच्छाधीना पराधीना च। तत्राद्यायामिष्टसाधनत्वधीः कारणम्, अन्त्यायां राजगुर्वादेराज्ञा प्रेरणाधीः। राजा अनिच्छन्तं मां प्रेरयति इत्यनुभवात्। प्रवर्तना च प्रवर्तयितुः परप्रवृत्त्यनुकूलो व्यापारविशेषः। स च चेतनस्य राजादेराज्ञादिः। अपौरुषेये वेदे तु वक्तुरभावादचेतनस्य वेदस्याभिधानात्मकः कश्चित् शब्दसमवेतोऽलौकिको व्यापारः। स च शब्दनिष्ठत्वात् शब्दकारणत्वाच्च शाब्दीभावनेत्युच्यते। तस्याः प्रवर्तनात्वेन ज्ञानवद्विषयकशक्तिग्रहश्च प्रयोज्यप्रयोजकवृद्धव्यवहारादेव। तत्रापि वृद्धव्यवहारे वाक्यात् तादृशे ज्ञाने जातेऽप्यवापोद्वापाभ्यां पदानां लिङत्वे शक्तिः सिद्ध्यति।

**आचार्यखण्डदेवमतम्**

रहस्यकृताऽऽचार्यखण्डदेवेन लिङर्थनिरूपणावसरे पक्षत्रयमुपन्यस्तं भाट्टतन्त्ररहस्यात्मके ग्रन्थे। तत्र प्रवृत्त्यनुकूलो व्यापारः प्रवर्तनेति प्रथमपक्षः। अयमत्र प्रवर्ततामित्याकारकत्वरूपविषयिताविशेषः पुरुषाभिप्रायालौकिकोभयसाधारण इति द्वितीयः पक्षः। जातिविशेष इच्छात्वमेव लिङ्गक्यमिति तृतीयः पक्षः। पक्षत्रयेऽस्मिन् इच्छायाः एव लिङर्थत्वं स्वीकरोति खण्डदेवः।

वस्तुतस्तु इच्छात्व[११] जातिरेव लिङादिशक्यतावच्छेदिका लाघवात् इति। एवं लिङर्थ इच्छेति स्वीकृत्य तत्पक्षेऽपि यदीच्छा आत्ममात्रनिष्ठा नाचेतननिष्ठेति विभाव्यते तदौपनिषदमीश्वरमपाङ्गीकृत्य तदीयेच्छैव लिङर्थ इति मतान्तरं खण्डयन् खण्डदेवः आह......... **"लोके लिङादेरिच्छायां शक्तिः वैदिकस्य लिङादेः अलौकिकप्रेरणायां लक्षणा"** इति।

**डॉ. रामबदन पाण्डेयः**
सहायक आचार्यः - व्याकरणस्य
श्रीएकरसानन्द आदर्शः संस्कृतमहाविद्यालयः,
मैनपुरी 205001

[११] भाट्टतन्त्ररहस्यम् - पृष्ठं २२